# Shri Ramakrishna Ashtakam

# श्रीरामकृष्णाष्टकम्

## Document Information

Text title : Shri Ramakrishna Ashtakam

File name : rAmakRRiShNAShTakam2.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Pramathanatha

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णाष्टकम्

प्रस्थानभेदान् विविधान् विरुद्धान् समन्वयेनैक्यमलम्भयद्यः ।
कृपामृताब्धिं तमचिन्त्यशक्तिं श्रीरामकृष्णं शरणं श्रयेऽहम् ॥ १॥

निरञ्जनं निष्कलमात्मतृप्तं सदाचिदानन्दतनुं प्रसन्नम् ।
प्रपन्नमर्त्यार्त्तिहरं नृदेवं युगावतारं भज रामकृष्णम् ॥ २॥

श्रीरामकृष्णौ पृथगेव पृथ्व्यां यदावतीर्णौ न तदा यदासीत् ।
तत्सर्वधर्मैक्य-समन्वयाख्यं कृत्यं यदीयं भुवनैकभव्यम् ॥ ३॥

श्रीरामकृष्णं मिलितावतीर्णं भूदेवरूपेण तमादिदेवम् ।
भजन् विवेकेन विहाय दम्भं नरः समाप्नोति भवार्तिशान्तिम् ॥ ४॥

पृथक्पृथक्धर्मनिषेवणेन सारं तदीयं स्वयमव्यलीकम् ।
सम्यक् समास्वाद्य जगद्धिताय श्रीरामकृष्णः वितरन्तमीडए ॥ ५॥

निरस्तमोहं परिपूर्णकामं भवाम्बुधेः पारदपारपोतम् ।
नवं नवं रूपमिहाददानं श्रीरामकृष्णं भजतां न दुःखम् ॥ ६॥

सदा प्रशान्तं सकलैकसेव्यमैश्वर्यवैराग्यनिधानभूतम् ।
नित्यैकरूपं समदर्शिनं तं गुरुं गुरूणां भज रामकृष्णम् ॥ ७॥

स्वजन्मना धन्यतमां धरित्रीं विधाय यो राजति निष्कलङ्कम् ।
तं पूर्णचन्द्रं क्षयहीनमेकं युगावतारं भज रामकृष्णम् ॥ ८॥

इति महामहोपाध्यायश्रीप्रमथनाथतर्कभूषणविरचितं
“श्रीरामकृष्णाष्टकम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*